अङ्क-२७
जनवरी-जून २०१६

**वेदविद्या**
ISSN-2230-8962

# छन्दसां वेदार्थे उपयोगित्वम्

**आचार्य सूर्यादेवी चतुर्वेदा**

परब्रह्मणा सर्वजनहिताय, सर्वकल्याणाय चादिसृष्टौ वेदज्ञानं सम्प्रहितम्। आदिसृष्ट्यां प्रदत्ते ईश्वरीयेऽस्मिन् वेदज्ञाने लौकिकपारलौकिकसुखसमृद्धेः ज्ञानविज्ञानं चकास्ति। एतद्वेदज्ञानं हि मन्त्रमयो विद्यते। मन्त्राणां कोऽर्थः? किञ्चैषु मन्त्रेषु सन्निहितम् ? इति विचारणायां समाधानभूतानि वेदज्ञैः विद्वद्भिः ग्रन्थरूपात्मकानि षडङ्गानि निबद्धानि । तानि च षडङ्गानि शिक्षाव्याकरणकल्पनिरुक्तछन्द-ज्योतिषाख्यानि। तत्रैतेषु षडङ्गेषु छन्दःशास्त्रं वेदार्थज्ञाने पादस्थानं[१] वेदार्थमहाप्रासादस्य मूलभित्तिवद् वर्तते।

**छन्दःशास्त्रप्रणेतारः**

छन्दश्शास्त्रस्य रचना कृतयुगे समारभत। सन्ति च अस्य छन्दश्शास्त्रस्यानेके प्रणेतारः आचार्याः। तेषामनेकेषामाचार्याणां यो नामनिर्देशः छन्दश्शास्त्रस्य भाष्यकृद्भिः कृतः। तदित्थम्–

**छन्दोज्ञानमिदं भवाद्भगवतो लेभे सुराणां गुरुः,**
**तस्माद् दुश्च्यवनस्ततोऽसुरगुरुर्माण्डव्यनामा ततः।**
**माण्डव्यादपि सैतवस्तत ऋषिर्यास्कस्ततः पिङ्गलः,**
**तस्येदं यशसा गुरोर्भुवि धृतं प्राप्यास्मदाद्यैः क्रमात्** ॥ (पिं.छं.सू.भा.समा.यादवप्रकाशः)

अर्थाद् एतच्छन्दोज्ञानं भगवतः भवात् = शिवात् सुरगुरुः = बृहस्पतिः, तस्माद् बृहस्पतेः, दुश्च्यवनः = इन्द्रः, इन्द्रात् असुरगुरुः = शुक्रः, शुक्रात् माण्डव्यः प्राप्तवान्, तस्माच्च माण्डव्यात् सैतवः, सैतवात् महर्षियास्कः, यास्काचार्यात् पिङ्गलेन छन्दश्शास्त्रस्य ज्ञानमधिगतम्। तस्मादस्मदादिभिः क्रमेणैतद् ज्ञानं सम्प्राप्य तस्य गुरोः यशसा संसारेऽस्मिन्नेतच्छन्दोज्ञानं सन्धृतं वर्तते।

**पिङ्गलकृतस्य**[२] छन्दश्शास्त्रस्य यादवप्रकाशेन कृतभाष्यस्यैतेन श्लोकेन सुज्ञातं यच्छन्दश्शास्त्रस्य परम्परा अतीवप्राचीना।

वार्तिकराजग्रन्थे[३], जयकीर्तिकृतछन्दोऽनुशासने[४] चादिग्रन्थेष्वपि छन्दश्शास्त्रप्रणेतृणां कथोप-कथनानि विद्यन्ते। उपनिदानसूत्रकारः आचार्यगार्ग्यः छन्दश्शास्त्रस्य प्राचीनतां निर्दिशन् स्वग्रन्थस्यान्ते लिलेख-

---

[१] छन्दः पादौ तु वेदस्य हस्तौ कल्पोऽथ पठ्यते । ज्योतिषामयनं चक्षुर्निरुक्तं श्रोत्रमुच्यते॥
शिक्षा घ्राणं तु वेदस्य मुखं व्याकरणं स्मृतम्। तस्मात् साङ्गमधीत्यैव ब्रह्मलोके महीयते॥ (पाणि.शिक्षा ४१-४२)

[२] पिङ्गलेनापि स्वछन्दःसूत्रे तण्डी, क्रौष्टुकिः, यास्कः, सैतवः, काश्यपः, रातः, माण्डव्य इति नामाख्यानामाचार्याणामुल्लेखः कृतोऽस्ति।

**ब्राह्मणात्तण्डिनश्चैव पिङ्गलाच्च महात्मनः।**
**निदानादुक्थशास्त्राश्च छन्दसां ज्ञानमुद्धृतम्॥**

अर्थात् तण्डिब्राह्मणात् महात्मनः पिङ्गलकृतछन्दःशास्त्रात् पतञ्जलिकृतनिदानसूत्राद् एवमुक्थशास्त्राच्चैतच्छन्दोज्ञानं समुद्धृतम्।

**छन्दसां प्रधानाचार्यो पिङ्गलः**

छन्दःशास्त्रप्रणेतृष्वाचार्येषु पिङ्गलाचार्योऽन्तिमः प्रधानश्चेति। आचार्यपिङ्गलस्यातिप्रसिद्धित्वाद् अर्वाक्काले पिङ्गलशब्दः छन्दःशास्त्रस्यैव पर्यायवाचित्वेन प्रसिद्धिमवाप। अन्यच्च पिङ्गलरचितं छन्दश्शास्त्रमेवाग्रे वेदाङ्गानां पठनपाठनप्रक्रमे सुमान्यं जातम्। इमां सुमान्यतां परिपुषन् याजुषपरिशिष्टे श्रीअण्णाशास्त्री वारेमहोदयेनोल्लिखितम् –

छन्दः पिङ्गलमुनिप्रणीतं छन्दःशास्त्रम्।
भाषा पाणिनिमुनिप्रणीतं व्याकरणशास्त्रम् ॥

अर्थात् छन्दश्शब्देन पिङ्गलमुनिविरचितं छन्दःशास्त्रं ग्राह्यम्, भाषापदेन च पाणिनिमुनिविरचितं व्याकरणशास्त्रं ज्ञेयम्।

महर्षिदयानन्दसरस्वतीमहाभागेनापि पिङ्गलाचार्यछन्दस्सूत्रमेव पठनीयमिति निर्दिष्टम्। यथा-

छन्दः पिङ्गलाचार्यकृतसूत्रभाष्यम् । (ऋ.भा.भू.ग्रन्थप्रामा.पृ.३०१)

छन्दसां प्रकाराः तद्ग्रन्थाश्च –

उपरिनिर्दिष्टेष्वेतेषु छन्दोग्रन्थेषु वर्णितानि छन्दांसि द्विप्रकारकाणि सन्ति – वैदिकानि, लौकिकानि च।

एतेषामुभयप्रकारकाणां छन्दसां विवेचनं लक्षणञ्च येषु ग्रन्थेषु वर्तते; ते ग्रन्था: त्रिविधाः-

१. वैदिकछन्दोग्रन्थाः = निदानसूत्रमुपनिदानसूत्रमादयो ग्रन्थाः वैदिकछन्दोग्रन्थाः। एतेषु वैदिकछन्दसां व्याख्यानं वर्तते।

२. लौकिकछन्दोग्रन्थाः = छन्दोमञ्जरी, छन्दोऽनुशासनम्, वृत्तरत्नाकरादयो ग्रन्थाः लौकिकछन्दोग्रन्थाः सन्ति । एतेषु ग्रन्थेषु लौकिकछन्दसां प्रतिपादितं वर्णनम्।

३. वैदिकलौकिकछन्दोग्रन्थाः = पिङ्गलकृतं छन्दःशास्त्रं, जयदेवकृतः छन्दोविचितिः आदिग्रन्थाः वैदिकलौकिकछन्दोनिर्देशकाः सन्ति। एतेषु ग्रन्थेषु वैदिकलौकिकोभयप्रकारकाणि छन्दांस्यनुशिष्यन्ते ।

---

[३] शिवगिरिजानन्दिफणीन्द्रबृहस्पतिच्यवनशुक्रमाण्डव्याः।
सैतवपिङ्गलगरुडप्रमुखा आद्या जयन्ति गुरुचरणाः॥ (पिं.छं.सू. सखारामदीक्षितपितृरचितवार्तिकराज)

[४] वाञ्छन्ति यतिं पिङ्गलवसिष्ठकौण्डिन्यकपिलकम्बलमुनयः।
नेच्छन्ति भरतकोहलमाण्डव्याश्वतरसैतवाद्याः केचित् ॥ (जैन जयकीर्ति कृ. छन्दोऽनु. १/१३)

**वैदिकलौकिकछन्दसां भेदकारणम्**

छन्दोज्ञापकेषु ग्रन्थेषु छन्दसां ये वैदिकलौकिकौ द्विप्रभेदौ दृश्येते तयोः भेदयोः कारणं निर्माणपद्धतिः। वैदिकानि छन्दांसि अक्षु अर्थात् अकाराद्यक्षरेषु आधृतानि सन्ति। वैदिकछन्दसां अक्षरगणना प्राधानिकी। अचां ह्रस्वदीर्घादयो मात्राः महत्त्वं न भजन्ते।

लौकिकानि छन्दांसि अक्षु अर्थात् अकाराद्यक्षरेषु आधृतानि सन्ति। वैदिकछन्दसां अक्षरगणना प्राधानिकी। अचां ह्रस्वदीर्घादयो मात्राः महत्त्वं न भजन्ते।

लौकिकानि छन्दांसि वर्णसङ्गीते आधृतानि वर्तन्ते। लौकिकछन्दःसु वर्णोच्चारणं महत्त्वपूर्णम्। वर्णानां गुरुलाघवादिमात्राणां गौरवास्पदं स्थानम्।[५] एतानि लौकिकछन्दांसि मात्रिकछन्दांस्युच्यन्ते।

**छन्दसो लक्षणम्**

छन्दः किं भवति ? छन्दश्शब्दस्य कोऽर्थः? इति स्पष्टं कुर्वद्भिः कात्यायनाद्याचार्यैः लिखितम्-

**यदक्षरपरिमाणं तच्छन्दः।**

वचनस्यार्थः – यदक्षराणां परिमाणं भवति, सः छन्दश्शब्देन ज्ञायते।

छन्दोऽक्षरसङ्ख्यावच्छेदकमुच्यते ।

अर्थाद् अक्षराणां सङ्ख्यायाः यद्, अवच्छेदकम् = नियामकं भवति, तच्छन्दश्शब्दाख्यायी भवति।

**छन्दश्शब्दस्य पदार्थः**

छन्दश्शब्दस्यैताभ्यां लक्षणाभ्यामेतादृशैः लक्षणैश्च सुज्ञायते यच्छन्दश्शब्दः परिमाणवाचकमेव भवति, न च पद्यवाचकः। इत्थं छन्दश्शब्दस्यैभिः लक्षणैः सुनिश्चितं ज्ञायते यच्चतुर्णां वेदानां सर्वे मन्त्राः छन्दोयुक्ताः सन्ति।

**छन्दसां स्रोतांसि वेदाः**

छन्दश्शास्त्रे येषां गायत्र्युष्णिगित्यादीनां छन्दसां वर्णनमस्ति, तेषां छन्दसां स्रोतांसि वेदाः वर्तन्ते। छन्दसामुद्भवो वेदेभ्य एव। आशिवाचार्यात् आपिङ्गलाचार्यं यैः यैः आचार्यैः छन्दस्सम्बन्धिनो ग्रन्थाः सृष्टाः तेषामाधारोऽन्येषां वेदाङ्गानामिव वेदो वर्तते। छन्दवेदाङ्गोऽपि वेदस्य विशिष्टं शास्त्रम्। गायत्र्यादीनां सप्त प्रमुखानां छन्दसां समुद्भावक एष मन्त्रः–

गायत्युष्णिगनुष्टुब्बृहती पङ्क्तिस्त्रिष्टुब्जगत्यै॥

अर्थात् गायत्री, उष्णिक, अनुष्टुप्, बृहती, पङ्क्ति, त्रिष्टुप् छन्दांसि च, जगत्यै= जगतीच्छन्दसे ज्ञायन्ते ।

अस्मिन् मन्त्रे यथा गायत्र्यादीनां सप्त छन्दसां निर्देशोऽस्ति। तथैव नामनिर्देशेन सार्धं गायत्र्यादीनां छन्दसां रचनाविधेरपि सङ्केतो वर्तते। रचनाविधेः सङ्केतकारणेनैव जगतीच्छन्दसः द्योतके जगतीपदे चतुर्थीविभक्तिः निर्दिष्टा।

---

[५] पञ्चमं लघु सर्वत्र सप्तमं द्विचतुर्थयोः। षष्ठं गुरुं विजानीयाद् एतत् पद्यस्य लक्षणम्॥ (श्रुतबोधः, श्लोकः ११)

तात्पर्यमिदं यद् गायत्रीच्छन्दसि २४ चतुर्विंशतिरक्षराणि भवन्ति। उत्तरोत्तरं चतुर्णां चतुर्णामक्षराणां वृद्धया जगतीपर्यन्तं छन्दसां रचना भवति। अस्यां छन्दोरचनाप्रक्रियायां जगतीच्छन्दः ४८ अष्टाचत्वारिंशदक्षरस्य सञ्जायते।

गायत्र्युष्णिगादिभ्यः छन्दोभ्योऽतिरिक्तानां माप्रमादीनां, विराडादीनां च छन्दसां स्रोतांस्यपि वेदेष्वेव विद्यन्ते।[६]

**प्रमुखाः छन्दोभेदाः**

वेदोक्तानामेतेषां छन्दसामनेकानि नामान्यनेकाश्च भेदाः वर्तन्ते। तेषु वेदोक्तेषु छन्दस्सु प्रमुखानि छन्दांसि गायत्र्यादीनि २६ षड्विंशतिश्छन्दांसि विद्यन्ते। येषां चत्वारो विभागास्सन्ति –

| १. प्राग्गायत्रीपञ्चकम् | | | २. प्रथमसप्तकम् | | |
|---|---|---|---|---|---|
| १. | मा | ४ | १. | गायत्री | २४ |
| २. | प्रमा | ८ | २. | उष्णिक् | २८ |
| ३. | प्रतिमा | १२ | ३. | अनुष्टुप् | ३२ |
| ४. | उपमा | १६ | ४. | बृहती | ३६ |
| ५. | समा | २० | ५. | पङ्क्ति | ४० |
| | | | ६. | त्रिष्टुप् | ४४ |
| | | | ७. | जगती | ४८ |

| ३. द्वितीयसप्तकम् | | | ४. तृतीयसप्तकम् | | |
|---|---|---|---|---|---|
| १. | अतिजगती | ५२ | १. | कृति | ८० |
| २. | शक्करी | ५६ | २. | प्रकृति | ८४ |
| ३. | अतिशक्करी | ६० | ३. | आकृति | ८८ |

[६] (१) मा छन्दः प्रमा छन्दः प्रतिमा छन्दो अस्रीवयश्छन्दः पङ्क्तिश्छन्द उष्णिक्छन्दो बृहती छन्दोऽनुष्टुप्छन्दो विराट् छन्दोगायत्री छन्दस्त्रिष्टुप्छन्दो जगतीछन्दः। (यजु. १४/१८)

(२) आच्छच्छन्दः प्रच्छच्छन्दः संयच्छन्दो वियच्छ न्दो बृहच्छन्दो रथन्तरञ्छन्दो निकायश्छन्दो विवधश्छन्दो गिरश्छन्दो भ्रजश्श्छन्दः संस्तुप्छन्दोऽनुष्टुप्छन्द एवश्छन्दो वरिवश्छन्दो वयश्छन्दो वयस्कृच्छन्दो विष्पर्धाश्छन्दो विशालं छन्दश्छदिश्छन्दो दूरोहणं छन्दस्तन्द्रं छन्दो अङ्काङ्कं छन्दः॥(यजु. १५/५)

(३) यद् गायत्रे अधि गायत्रमाहितं त्रैष्टुभाद् वा त्रैष्टुभं निरतक्षत ।
यद्वा जगज्जगत्याहितं पदं य इत् तद्विदुस्ते अमृतत्वमानशुः॥ (ऋ. १/१६७/२३)

(४) गायत्रेण प्रति मिमीते अर्कमर्केण साम त्रैष्टुभेन वाकम्।
वाकेन वाकं द्विपदा चतुष्पदाऽक्षरेण मिमते सप्त वाणीः॥ (ऋ. १/१६४/२४)

| | | | | | |
|---|---|---|---|---|---|
| ४. | अष्टि | ६४ | ४. | विकृति | ९२ |
| ५. | अत्यष्टि | ६८ | ५. | सङ्कृति | ९६ |
| ६. | धृति | ७२ | ६. | अभिकृति | १०० |
| ७. | अतिधृति | ७६ | ७. | उत्कृति | १०४ |

**छन्दःक्रमोऽपि वेदविहितः**

एतेषां छन्दसां क्रमोऽपि वेदैरेव सुनिश्चितम् । अस्मिन् सुनिश्चिते क्रमे पूर्वस्माच्च्छन्दसः चतुर्णामक्षराणां विवृद्धयैवोत्तरोत्तराणि छन्दांसि निर्मीयन्ते । इत्थं छन्दसामस्य क्रमस्याक्षरवृद्धेश्च ज्ञापको मन्त्रोऽस्ति-

**स॒प्त च्छन्दांसि चतुरु॒त्तराण्य॒न्यो अ॒न्यस्मि॒न्नध्यार्पितानि ।** (अथर्व. ८.९.१५)

अर्थात् छन्दांसि सप्त भवन्ति तत्र चतुः उत्तराणि= उत्तरोत्तरेषु छन्दस्सु चत्वारि चत्वार्यक्षराणि वर्धन्ते, अन्यः = उत्तरोत्तराणि छन्दांसि, अन्यस्मिन् अधि = पूर्वेषु पूर्वेषु छन्दस्सु, आर्पितानि = निविष्टानि भवन्ति ।

मन्त्रेण स्पष्टं जातं यच्छन्दसां क्रमो वेदोक्तः। एवञ्च छन्दसामक्षरसङ्ख्यापि वेदोक्ता एव वर्तते।

**छन्दसामन्येऽनेके भेदाः**

पञ्चके एवं सप्तकेषु निबद्धेषु गायत्र्यादिषु सर्वेषु छन्दःस्वक्षराणां न्यूनाधिकतया निचृत्, विराड् आदयोऽनेके छन्दोभेदाः जायन्ते।

**वैदिकछन्दोरचनायाः द्वौ प्रकारौ**

वैदिकानि छन्दांस्यक्षरगणनया सम्पद्यन्ते। अस्याः गणनायाः द्वौ प्रकारौ स्तः –

१. केवलानि अक्षरगणनानुसारिणः छन्दांसि
२. पादाक्षरगणनानुसारिणः छन्दांसि

अक्षरगणनानुसारिणां छन्दसां द्विचतुष्केषु निबद्धानां ८ भेदाः वर्तन्ते-

| प्रथमचतुष्कम् | | द्वितीयचतुष्कम् | |
|---|---|---|---|
| १. | दैवम् | १. | याजुषम् |
| २. | आसुरम् | २. | साम्नम् |
| ३. | प्राजापत्यम् | ३. | आर्चम् |
| ४. | आर्षम् | ४. | ब्राह्मम् |

**विशेषः**

एतानि दैवयाजुषादिछन्दोभेदानि गायत्र्यादिषु प्रथमसप्तकेषु छन्दःसु एवं जगत्यादिषु द्वितीयसप्तकेषु छन्दस्सु एव भवन्ति, नान्यत्र।

**प्रथमचतुष्के उदाहरणदिक् -**

| | |
|---|---|
| दैवी गायत्री | १ |
| आसुरी गायत्री | १५ |
| प्राजापत्या गायत्री | ८ |
| आर्षी गायत्री | २४ |

एतादृशमेव एकैकाक्षरस्य वृद्ध्या, ह्रासेन वा दैवी उष्णिक्, दैवी अनुष्टुप् आदीनि चतुष्कानि छन्दांसि जायन्ते। यथा -

**दैवश्छन्दः** एकाक्षरेण प्रारभ्यते। उत्तरोत्तरं सप्तकस्य छन्दस्सु एकस्यैकस्याक्षरस्य वृद्धिर्भवति। एतया वृद्ध्या गायत्र्यादिदैवीच्छन्दसामित्थं सञ्ज्ञा भवति - गायत्री - १, उष्णिक् - २, अनुष्टुप् - ३, बृहती- ४, पङ्क्ति - ५, त्रिष्टुप् - ६, जगती - ७ ।

**आसुरश्छन्दः** १५ अक्षरेण प्रारभ्यते। उत्तरोत्तरं सप्तकस्य छन्दःसु एकैकस्याक्षरस्य ह्रासो भवति। एतेन ह्रासेन आसुरीगायत्री, आसुर्युष्णिगादिछन्दःसु इत्थं सञ्ज्ञा भवति - गायत्री - १, उष्णिक् - १४, अनुष्टुप् - १३, बृहती - १२, पङ्क्ति - ११, त्रिष्टुप् - १०, जगती - ९ ।

**प्राजापत्यश्छन्दः** ८ अक्षरेण प्रारभ्यते। उत्तरोत्तरं सप्तकस्य छन्दःसु ४ - ४ अक्षराणि वर्धन्ते। एतया वृद्ध्या गायत्र्यादिछन्दसामेतादृशी सञ्ज्ञोपजायते - गायत्री - ८, उष्णिक् - १२, अनुष्टुप् - १६, बृहती - २०, पङ्क्ति - २४, त्रिष्टुप् - २८, जगती - ३२ ।

**आर्षाणां** गायत्र्यादिछन्दसामक्षरसञ्ज्ञा दैवासुरप्राजापत्यत्रयाणां छन्दसां सञ्ज्ञा समं भवति। यथा - गायत्री - १ + १५ + ८ = २४, उष्णिक् - २ + १४ + १२ = २८, अनुष्टुप् - ३ + १३ + १६ = ३२, बृहती - ४ + १२ + २० = ३६, पङ्क्ति - ५ + ११ + २४ = ४०, त्रिष्टुप् - ६ + १० + २८ = ४४, जगती - ७ + ९ + ३२ = ४८ ।

**द्वितीयचतुष्के उदाहरणदिक् -**

| | |
|---|---|
| याजुषी गायत्री | ६ |
| साम्नी गायत्री | १२ |
| आर्ची गायत्री | १८ |
| ब्राह्मी गायत्री | ३६ |

एवमेव द्वयोः - २ अक्षरयोः वृद्ध्या, ह्रासेन वा याजुषी उष्णिक्, याजुषी अनुष्टुप् आदीनि द्वितीयचतुष्कस्य छन्दांसि भवन्ति । यथा -

**याजुषञ्छन्दः** ६ अक्षरेणारम्भ्यते । उत्तरोत्तरं सप्तकस्य छन्दस्सु १ - १ अक्षरस्य वृद्धिर्भवति । एतया वृद्ध्या गायत्र्यादियाजुषञ्छन्दसामक्षरसङ्ख्यास्थितिः इत्थं भवति - गायत्री - ६, उष्णिक् - ७, अनुष्टुप् - ८, बृहती - ९, पङ्क्ति - १०, त्रिष्टुप् - ११, जगती - १२ ।

**साम्नञ्छन्दः** १२ अक्षरेण प्रारम्भ्यते । उत्तरोत्तरं सप्तकस्य छन्दस्सु २ - २ अक्षरयोः वृद्धिर्भवति । एतया वृद्ध्या साम्नीगायत्र्यादिछन्दसामक्षरगणना भवति - गायत्री - १२, उष्णिक् - १४, अनुष्टुप् - १६, बृहती - १८, पङ्क्ति - २०, त्रिष्टुप् - २२, जगती - २४ ।

**आर्चञ्छन्दः** १८ अक्षरेणारभ्यते । उत्तरोत्तरं सप्तकस्य छन्दस्सु ३ - ३ अक्षराणि वर्धन्ते।एतयाक्षरवृद्ध्या आर्चगायत्रीच्छन्दसामीदृशी सङ्ख्योपजायते - गायत्री - १८, उष्णिक् - २१, अनुष्टुप् - २४, बृहती - २७, पङ्क्ति - ३०, त्रिष्टुप् - ३३, जगती - ३६ ।

**ब्राह्मञ्छन्दः** त्रयाणां याजुषसाम्नार्चगायत्र्यादिछन्दसां या संख्या भवति, तया संख्यासमं भवति। यथा - गायत्री - ६ + १२ + १८ = ३६, उष्णिक् - ७ + १४ + २१ = ४२, अनुष्टुप् - ८ + १६ + २४ = ४८, बृहती - ९ + १८ + २७ = ५४, पंक्ति - १० + २० + ३० = ६०, त्रिष्टुप् - ११ + २२ + ३३ = ६६, जगती - १२ + २४ + ३६ = ७२ ।

### वर्धमानादयश्छन्दोभेदाः

निर्दिष्टेभ्य एतेभ्योऽतिरिक्ता अन्येऽपि वर्धमानादयोऽनेके भेदप्रभेदाः छन्दसां सन्ति।

छन्दसामेतेषु प्रकारेषु एतादृशेषु चान्यप्रकारेषु वेदानां सर्वे मन्त्राः निबद्धाः वर्तन्ते । एतेषां वैदिकछन्दसां सर्वत्राक्षरगणनानुसारिव्यवस्था पादाक्षरगणनानुसारी चैव व्यवस्था विद्यते। लौकिकछन्दसामिव वर्णानुसारिगुरुलाघवपादव्यव्यवस्था नास्ति ।

### छन्दसां प्रथमसप्तकस्य पादव्यवस्था

१. गायत्रीछन्दसि प्रायः ३ पादाः, प्रतिपादे ८ अक्षराणि सन्ति २४ अक्षराणि भवन्ति।

२. उष्णिक्छन्दसि प्रायः ३ पादाः, अन्तिमपादे[७] ४ अक्षराणि वर्धमानानि ८+८=१२ २८ अक्षराणि भवन्ति।

३. अनुष्टुप्छन्दसि प्रायः ४ पादाः, प्रतिपादे ८ अक्षराणि सन्ति ३२ अक्षराणि भवन्ति।

४. बृहतीच्छन्दसि प्रायः ४ पादाः, प्रतिपादे ९ अक्षराणि सन्ति ३६ अक्षराणि भवन्ति।

५. पङ्क्तिछन्दसि प्रायः ४ पादाः, प्रतिपादे[८] १२+८+१२+८ ४० अक्षराणि भवन्ति।

---

[७] क्वचित् आदिपादे, मध्यपादे वा ४ अक्षराणि वर्धन्ते।

[८] अस्मिन् छन्दसि १२+८+१२+८, ८+१२+८+१२ एवञ्च ८+८+१२+१२ आदिरूपात्मकेनाक्षरव्यतिक्रमवृत्त्या अक्षरवृद्धिर्भवति।

| | | | | |
|---|---|---|---|---|
| ६. त्रिष्टुप्छन्दसि | प्रायः ४ पादाः, | प्रतिपादे | ११ अक्षराणि सन्ति | ४४ अक्षराणि भवन्ति। |
| ७. जगतीछन्दसि | प्रायः ४ पादाः, | प्रतिपादे | १२ अक्षराणि सन्ति | ४८ अक्षराणि भवन्ति। |

**विशेषः**

वैदिकछन्दसामेषा पादव्यवस्था केवलं त्रिपदा, चतुष्पदा एव न भवति, अपितु एकपदा, द्विपदा, पञ्चपदापि भवति। एकपदादिषु पादव्यवस्थासु अक्षरसङ्ख्यासु कापि विप्रतिपत्तिर्न भवति।

**छन्दसां वेदार्थे उपयोगित्वम्**

वैदिकच्छन्दसां येयं पादव्यवस्था वर्तते, सा मन्त्रार्थकरणे परमसहायिका। छन्दोज्ञानेन पादान् विभज्य मन्त्रार्थकरणं सुकरं भवति। एतेनैव जैमिन्यृषिणा पठितम् -

**तेषामृग्यत्रार्थवशेन पादव्यवस्था** ॥ (मीमां. द. २/१/३५)

अर्थात् तेषां मन्त्राणामृक्सञ्ज्ञा भवति, येष्वर्थानुसारी पादव्यवस्था वर्तते।

तात्पर्यमिदं मन्त्राणां पादव्यवस्था अर्थप्रकाशनाय विद्यते, सा च पादव्यवस्था वेदेषु सर्वत्र वर्तते। तद्यथा - ऋग्वेदस्य प्रथममण्डलस्य प्रथमसूक्तस्य प्रथममन्त्रो वर्तते -

**अ॒ग्निमी॑ळे पु॒रोहि॑तं य॒ज्ञस्य॑ दे॒वमृ॒त्विज॑म्।**
**होता॑रं रत्न॒धात॑मम् ॥ (ऋ. १/१/१)**

अस्य मन्त्रस्य गायत्रीच्छन्दः। एतद् गायत्रीच्छन्दः यथानिर्दिष्टेन नियमेन त्रिपद्वत्। त्रिपद्वतेऽस्मिन् गायत्रीच्छन्दे एकैकस्मिन् पादे ८-८ अक्षराणि सन्ति। यथा

| | | | | |
|---|---|---|---|---|
| १. अ ग्नि मी ळे पु रो हि तम् | एष | प्रथमपादः | ८ | अक्षराणि |
| २. य ज्ञ स्य दे व मृ त्वि जम् | एष | द्वितीयपादः | ८ | अक्षराणि |
| ३. हो ता रं र त्न धा त मम् | एष | तृतीयपादः | ८ | अक्षराणि |
| | | पूर्णानि | २४ | अक्षराणि |

इत्थम् अग्निमीळे अस्मिन्नृङ्मन्त्रे त्रयः पादाः एवञ्च २४ अक्षराणि सन्ति। गायत्रीच्छन्दवतोऽस्य मन्त्रस्यानया पादव्यवस्थयार्थः समपद्यत -

अर्थात् अग्निम् ईळे पुरोहितम् = पूर्वतः विद्यमानं धारकमग्रणीं परमात्मानमहं स्तौमि, यज्ञस्य देवम् ऋत्विजम् = अस्मिन् तथा तृतीयपादे 'अग्निम्, ईळे' एतौ द्वौ पदौ समाहृत्यार्थोऽभूत् - यज्ञस्य = सृष्टेः, कर्मणः, पदार्थानाञ्च, देवम् = प्रकाशकम्, ऋत्विजम् = ऋतौ - २ उत्पत्तिकारकमुपास्यञ्चाग्निं स्तौमि, होतारं रत्नधातमम् = आदानप्रदानस्य व्यवस्थापकस्य हिरण्यरत्नानां धारकस्याग्नेः स्तवनं करोमि।

**अग्निमीळे०** मन्त्रस्यैषोऽर्थः छन्दसां पादव्यवस्थयोपपन्नः। अन्यच्च छन्दसः पादव्यवस्थया पूर्वपादस्य 'ईळे' क्रिया 'अग्निम्' कर्मपदस्याध्याहारेणावान्तरार्थः उपपन्नः। छन्दसां ज्ञानेन विना मन्त्रस्यार्थकरणं नैव सुकरम्।

छन्दोज्ञानाभावे किङ्काठिन्यं भवति ? एतदृग्वेदस्यास्यैव प्रथमसूक्तस्य अग्रिममन्त्रे द्रष्टुं शक्यते। मन्त्रोऽस्ति -

**अ॒ग्निः पूर्वे॑भि॒र्ऋषि॑भि॒रीड्यो॒ नूत॑नैरु॒त। स दे॒वाँ एह व॑क्षति ॥** (ऋ. १/१/२)

एष मन्त्रोऽपि निचृद्गायत्रीछन्दवांश्चास्ति, त्रयश्च पादाः। यथा -

| | | | | |
|---|---|---|---|---|
| १. अग्निः पूर्वेभिः ऋषिभिः | इति | प्रथमपादः | ८ | अक्षराणि |
| २. ईड्यो नूतनैरुत | इति | द्वितीयपादः | ७ | अक्षराणि |
| ३. स देवाँ एह वक्षति | इति | तृतीयपादः | ८ | अक्षराणि |
| | | पूर्णानि | २३ | अक्षराणि |

छन्दसः सामान्यनियमानुसारेण पूर्वमन्त्रवदनेन पादविभागेनास्मिन्नपि मन्त्रे ३ त्रयः पादाः २३ त्रयोविंशतिश्चाक्षराणि विद्यन्ते गायत्रीच्छन्दश्च। परमत्र पादविभागादिसत्स्वप्यर्थ उपपन्नो न भवति। अर्थानुपपत्तेः कारणमर्थाधिष्ठिते पादरूपे वाक्ये क्रियाया अभावः। अर्थश्च क्रिययोपपद्यते।[१] सा च क्रिया द्वितीयपादे वर्तते। क्रियाभावात् प्रथमपादस्यार्थो नोपपन्नो भवति।

छन्दोज्ञा त्वैतादृशेषु स्थलेष्वपि सुगमतयार्थोपलब्धिर्कुरुते। यतो ह्यर्थानुसारिपादव्यवस्थार्थं निदानसूत्रकारेणैतद्वचनमुक्तम् -

**अष्टाक्षर आपञ्चाक्षरतायाः प्रतिक्रामति। ..........।**

**आचतुरक्षरताया इत्येके।**

**आदशाक्षरताया अभिक्रामति॥ (निदानसूत्रं पृ. १ ॥)**

अर्थाद्यो गायत्रीच्छन्दसोऽष्टाक्षरस्य पादः, स पञ्चाक्षरस्य भवति, ............, चतुर्णामक्षरस्य भवति, अथ च दशाक्षरेष्वप्यतिक्रमते।

अनेन निदानसूत्रकारस्य वचनेन **अग्निः पूर्वेभिः०** मन्त्रस्य प्रथमपादः दशाक्षरस्य विज्ञास्यते। द्वितीयपादः पञ्चाक्षरस्य, तृतीयपादश्चाष्टाक्षरस्य भविष्यति।

मन्त्रस्यैषा पादव्यवस्था छन्दोज्ञानेनैव विज्ञायते। एतया पादव्यवस्थया मन्त्रस्य पादविभागाः इत्थं सञ्जाताः -

| | | | | |
|---|---|---|---|---|
| १. अग्निः पूर्वेभिः ऋषिभिः ईड्यः | इति | प्रथमपादः | १० | अक्षराणि |
| २. नूतनैरुत | इति | द्वितीयपादः | ५ | अक्षराणि |
| ३. स देवाँ एह वक्षति | इति | तृतीयपादः | ८ | अक्षराणि |
| | | पूर्णानि | २३ | अक्षराणि |

निदानसूत्रकारस्यानेन वचनेन पूर्वपादे **'ईड्यः'** क्रियायाः सम्बन्धोऽभवत्। अनेन सम्बन्धेन मन्त्रस्येत्थं सुस्पष्टतरोऽर्थोऽजायत -

[१] एकतिङ् वाक्यम्। (पात. महाभा. २/१/१, पृ. ३३७)

अर्थात् अग्निः पूर्वेभिः ऋषिभिः ईड्यः - यः पूर्वेभ्यः ऋषिभ्यः स्तोतव्यः, उत नूतनैः = स एव नूतनशब्दवाच्यैः अस्मदादिभिरपि स्तोतव्यः स्तुतियोग्यश्च, स देवान् एह वक्षति = सः स्तुतोऽग्निः, देवान् = विदुषः, एह = सर्वतोऽस्मिन् संसारे प्राप्नोतु।

एष मन्त्रः छन्दसां वेदार्थे उपयोगित्वे उदाहरणदिङ्मात्रम्। वेदानां सर्वे मन्त्राः वेदार्थे छन्दसामुपयोगितां निर्दिशन्ति। तद्यथा -

**ऊर्ध्व ऊ षु ण ऊतये तिष्ठा देवो न सविता।**
**ऊर्ध्वो वाजस्य सनिता यदञ्जिभिर्वाघद्भिर्विह्वयामहे॥** (ऋ. १/३६/१३)

मन्त्रस्य देवता वर्ततेऽग्निः। अस्मिन् मन्त्रे उपरिष्टाद्बृहतीच्छन्दः, ४ चत्वारश्च पादाः। यथा -

| | | | | |
|---|---|---|---|---|
| १. ऊर्ध्व ऊ षु ण ऊतये | इति | ८ | अक्षरस्य | प्रथमपादः |
| २. तिष्ठा देवो न सविता | इति | ८ | अक्षरस्य | द्वितीयपादः |
| ३. ऊर्ध्वो वाजस्य सनिता | इति | ८ | अक्षरस्य | तृतीयपादः |
| ४. यद् अञ्जिभिः वाघद्भिः विह्वयामहे | इति | १२ | अक्षरस्य | चतुर्थपादः |
| | पूर्णानि | ३६ | अक्षराणि | |

मन्त्रस्यैषा पादव्यवस्था छन्दसः सामान्यनियमस्याक्षरगणनानुसारी विद्यते। चतुर्ष्वपि पादेषु ३६ अक्षराणि सन्ति। अस्यां पादव्यवस्थायां मन्त्रार्थो नैव सङ्गच्छतेऽतोऽस्य उपरिष्टाद्बृहतीच्छन्दसः प्रथमपादव्यवस्था निदानसूत्रकारस्य 'आ दशाक्षरतायाः अभिक्रामति' वचनविधया दशाक्षरवते पादे करिष्यते, येन चार्थो सङ्गच्छेत। छन्दसानया पादव्यवस्था एतादृक् पादविभागो भविष्यति -

| | | | | |
|---|---|---|---|---|
| १. ऊर्ध्व ऊ षु ण ऊतये तिष्ठा | इति | १० | अक्षरस्य | प्रथमपादः |
| २. देवो न सविता | इति | ६ | अक्षरस्य | द्वितीयपादः |
| ३. ऊर्ध्वो वाजस्य सनिता | इति | ८ | अक्षरस्य | तृतीयपादः |
| ४. यद् अञ्जिभिः वाघद्भिः विह्वयामहे | इति | १२ | अक्षरस्य | चतुर्थपादः |
| | पूर्णानि | ३६ | अक्षराणि | |

अर्थात् ऊर्ध्वः ऊ षु णः ऊतये तिष्ठा = उन्नतकारकः निश्चयेनास्मान् रक्षणाय सुस्थितो भवेत्, देवः न सविता = प्रकाशकस्योत्पादकस्य प्रेरकस्य सूर्यस्य चेव, ऊर्ध्वः वाजस्य सनिता = उन्नतेः कारकोऽन्नस्य, बलस्य, सङ्ग्रामस्य च सहायकः, यद् अञ्जिभिः वाघद्भिः विह्वयामहे = यस्मात् गतिशीलैः बुद्धिमद्भिः सार्धं विशेषेण स्तुमः।

**छन्दसां वेदार्थेऽनुपयोगित्वं वाचकाः केचनाचार्याः**

गायत्र्यादिच्छन्दसां वेदार्थस्योपयोगितां स्कन्दस्वामी[१०] सदृशाः केचन विद्वांसः न स्वीकुर्वन्ति। तेषां मते छन्दोज्ञानं नैवोपयोगी। परञ्च केचन दुर्गाचार्यः[११], जयतीर्थः[१२] आदयो विद्वांसस्तु वेदार्थे छन्दसामुपयोगित्वं स्वीकुर्वन्ति।

गायत्र्युष्णिगादीनि छन्दांसि सुसङ्गते वेदार्थे सहायकानीत्युपर्युक्तेभ्यः मन्त्रेभ्यः सुस्पष्टम्।

**छन्दोभिः अज्ञातार्थावबोधः विशिष्टवेदार्थोऽभिज्ञानञ्च**

एतेषु गायत्र्यादिषु छन्दस्सु एतदपि सामर्थ्यम्, यद्येषां मन्त्राणां निर्दिशद्भिः पिङ्गलाचार्यैः छन्दश्शास्त्रस्य तृतीयाध्यायेऽभिहितम् -

**अग्निः सविता सोमो बृहस्पतिमित्रावरुणाविन्द्रो विश्वेदेवाः देवताः।** (छन्दः शा. ३/५३ )

अर्थात् गायत्रीच्छन्दसोऽग्निः, उष्णिहः सविता, अनुष्टुभः सोमः, बृहतीच्छन्दसो बृहस्पतिः, पङ्क्तेः मित्रावरुणौ, त्रिष्टुभः इन्द्रः, जगतीच्छन्दसो विश्वेदेवाः देवताः भवन्ति।

वचनेऽस्मिन् देवताशब्दः प्रतिपाद्यविषयस्य वाचकः। छन्दश्शास्त्रस्यास्य वचनस्य तात्पर्यं यद् गायत्रीच्छन्दवतो मन्त्रस्य प्रतिपाद्यविषयोऽग्निः, उष्णिग्छन्दवतः प्रतिपाद्यविषयः सविता, अनुष्टुप्छन्दवतः प्रतिपाद्यविषय सोमः, बृहतीच्छन्दवतः प्रतिपाद्यविषयः बृहस्पतिः, पङ्क्तिछन्दवतः प्रतिपाद्यविषयौ मित्रावरुणौ, त्रिष्टुप्छन्दवतः प्रतिपाद्यविषय इन्द्रः, जगतीच्छन्दवतश्च मन्त्रस्य प्रतिपाद्यविषयो विश्वेदेवाः भवति।

छन्दसामेतद्विषयविज्ञानमनिर्णीतेषु विषयवत्सु मन्त्रेषु ज्ञेयम्।

**वेदार्थे उपयुज्यवतां छन्दसां सामर्थ्यम्**

गायत्र्यादिच्छन्दांसि यथा मन्त्राणाम् अग्निः, सविता, सोम आदिविषयाणां प्रतिपादकास्सन्ति। मन्त्राणां तथैव तानि छन्दांसि मन्त्रोक्तान् विशिष्टान् अर्थानपि प्रकटयन्ति। ऐतरेयब्राह्मणे मन्त्रोक्तानां विशिष्टलाभप्रकाशकानां छन्दसामेकं रूपकं निबद्धं वर्तते -

**गायत्र्यौ स्विष्टकृतः संयाज्ये कुर्वीत तेजस्कामो ब्रह्मवर्चसकामः।**
**तेजो वै ब्रह्मवर्चसं गायत्री।**
**तेजस्वी ब्रह्मवर्चसी भवति य एवं विद्वान् गायत्र्यौ कुरुते।**

---

[१०] तत्रार्षदेवतयोरर्थयोर्बोधने उपयुज्यमानत्वात् ते दर्शयिष्येते, न छन्दः अनुपयुज्यमानत्वात्। (स्कन्द. ऋ. भा. भू.)

[११] यो ह वा अविदितार्षेयश्छन्दोदैवतब्राह्मणेन मन्त्रेण याजयति वाऽध्यापयति वा स्थाणुं वर्च्छति गर्त्ते वा पद्यति, प्र वा मीयते, पापीयान् भवति, यातयामान्यस्य छन्दांसि भवन्ति। (आर्षेयब्राह्मण तथा दुर्ग निरु. १/१/१, पृ. २)

[१२] मन्त्राणां ब्राह्मणार्षेयच्छन्दोदैवतविद् याजनाध्यापनाभ्यां श्रेयोऽधिगच्छति।
एताभ्यामेवानेवं विदो यातयामानि च्छन्दांसि भवन्ति॥
स्थाणुं वर्च्छति गर्त्तं वा पात्यते प्रमीयते वा पापीयान् भवतीति विज्ञायते॥ (कात्या. सर्वानु. १/३-५)

**उष्णिहा वाऽऽयुष्कामः कुर्वीत।**
**आयुर्वा उष्णिक्।**
**सर्वमायुरेति य एवं विद्वानुष्णिहौ कुरुते।**
**अनुष्टुभौ स्वर्गकामः कुर्वीत।**
**प्रतितिष्ठति य एवं विद्वाननुष्टुभौ कुरुते।**
**श्रीर्वै यशश्छन्दसां बृहती।**
**श्रियमेव यश आत्मन् धत्ते य एवं विद्वान् बृहत्यौ कुरुते।**
**पङ्क्ती यज्ञकामः कुर्वीत।**
**पाङ्क्तो वै यज्ञः।**
**उपैनं यज्ञो नमति य एवं विद्वान् पङ्क्ती कुरुते।**
**त्रिष्टुभौ वीर्यकामः कुर्वीत।**
**ओजो वा इन्द्रियं वीर्यं वा त्रिष्टुप्।**
**ओजस्वीन्द्रियवान् वीर्यवान् भवति य एवं विद्वांस्त्रिष्टुभौ कुरुते।**
**जगत्यौ पशुकामः कुर्वीत।**
**जागता वै पशवः।**
**पशुमान् भवति य एवं विद्वाञ्जगत्यौ कुरुते।**
**विराजावन्नाद्यकामः कुर्वीत।**
**अन्नं वै विराट्।**
**तस्माद्यस्यैवेह भूयिष्ठमन्नं भवति स एव भूयिष्ठं लोके विराजति तद्विराजो विराड्त्वम्।**

(ऐ.ब्रा. १/५/५, पृ. ४०-४४)

अर्थात् स्विष्टकृद्यागस्य याज्यानुवाक्यापठनकाले तेजसः कामः, ब्रह्मवर्चसस्य च कामः गायत्रीच्छन्दस्वन्तौ द्वौ मन्त्रौ पुरोऽनुवाक्या याज्यानुवाक्यारूपेण च पठेत्। गायत्रीच्छन्दस्वान् मन्त्रः तेजसा = शरीरशोभाशक्त्या, ब्रह्मवर्चसा = श्रुताध्ययनसम्पत्त्या पूर्णो भवति। य गायत्र्या एतत् फलं ज्ञात्वा द्वौ गायत्रीच्छन्दस्वन्तौ मन्त्रौ प्रयुनक्ति, स तेजसा, ब्रह्मवर्चसेन च युक्तो उपजायते।

आयुमिच्छन् द्वावुष्णिक्छन्दस्कौ मन्त्रौ पठेत्। यतोहि उष्णिक्छन्द आयुरूपः। अस्मिन् छन्दसि गायत्रीच्छन्दसः ४ चत्वार्यक्षराण्यधिकानि सन्ति, तस्मादुष्णिक्छन्दः आयुषो द्योतको भवति। य उष्णिक्छन्दस इदं विशेषं विज्ञाय द्वावुष्णिक्छन्दस्कौ मन्त्रौ प्रयुङ्क्ते, सः सर्वम् = पूर्णमायु आशतवर्षं प्राप्नोति।

स्वर्गम् = सुखविशेषमिच्छन्ननुष्टुप्छन्दस्कौ द्वौ मन्त्रौ प्रयुञ्ज्यात्। योऽनुष्टुप्छन्दस एतां स्वर्गलोकप्राप्तिं विज्ञाय द्वौ अनुष्टुप्छन्दस्कौ मन्त्रौ प्रयोजति, सः स्वर्गे प्रतिष्ठति।

श्रियमिच्छन् यशसमिच्छन् द्वौ बृहतीच्छन्दस्कौ मन्त्रौ प्रयुज्येत। छन्दसां मध्ये बृहतीच्छन्दः श्रीरूपः यशोरूपश्च वर्तते। यो बृहतीच्छन्दसः एतं गरिम्णं विज्ञाय द्वौ बृहतीच्छन्दस्कौ मन्त्रौ प्रयुज्यते, सः श्रीः यशश्च धारयति।

यज्ञमिच्छन् पङ्क्तिच्छन्दस्कौ द्वौ मन्त्रौ पठेत्। यतोहि यज्ञः पाङ्क्तः = पञ्चावयवो भवति। यः पङ्क्तेः इमं विशेषं विज्ञाय द्वौ पङ्क्तिच्छन्दस्कौ मन्त्रौ प्रयोजयति, तं यज्ञो वर्धयति।

वीर्यमिच्छन् द्वौ त्रिष्टुप्छन्दस्कौ मन्त्रौ पठेत्। त्रिष्टुप्छन्दो वीर्यस्य = शरीरबलस्य, इन्द्रियस्य = चक्षुरादिशक्तेः एवञ्च ओजसः = अष्टमधातुबलस्याधारोऽस्ति। य इमां विशेषतां विज्ञाय त्रिष्टुप्छन्दस्कौ मन्त्रौ प्रयुङ्क्ते, स ओजस्वी, इन्द्रियवान्, वीर्यवान् भवति।

पशुमिच्छन् द्वौ जगतीच्छन्दस्कमन्त्रौ प्रयुञ्जीत। पशवो जगतीछन्दस्केन सम्बद्धाः। योऽस्य छन्दसः पशुसम्बद्धतां विज्ञाय जगतीच्छन्दस्कौ द्वौ मन्त्रौ प्रयोजति, सः पशुभिर्युक्तो भवति।

अन्नमिच्छन् विराट्छन्दस्कौ द्वौ मन्त्रौ पठेत्। विराट्छन्दोऽन्नरूपः। अस्मात् कारणादेवास्मिँल्लोके यो बह्वन्नवान् भवति, स एवास्मिन् संसारेऽत्यधिकं विराजते।

तात्पर्यमिदं गायत्रीच्छन्दस्कानां मन्त्राणां पाठकस्तेजः, ब्रह्मवर्चसञ्च प्राप्नोति। उष्णिक्छन्दस्कानां मन्त्राणां पाठकः दीर्घायुष्यमधिगच्छति। अनुष्टुप्छन्दस्वतां मन्त्राणां पाठकः स्वर्गम् = सुखविशेषं प्राप्नोति। बृहतीच्छन्दस्कानां मन्त्राणां पाठकः श्रियं यशश्च लभते। पङ्क्तिच्छन्दस्कानां मन्त्राणां पाठको यज्ञस्य लाभान्नर्जयति। त्रिष्टुप्छन्दस्कानां मन्त्राणां प्रयोक्ता वीर्यम् = शरीरबलम्, चक्षुरादीन्द्रियबलम्, ओजः = धातुबलञ्च प्राप्नोति। जगतीच्छन्दवतां मन्त्राणां प्रयोक्ता पशून् लभते। विराट्छन्दोवतां मन्त्राणां प्रयोगेण बह्वन्नं प्राप्यते।

गायत्र्यादीनां छन्दोमयानां मन्त्राणां मननचिन्तनेन क्रमशः तेजः, ब्रह्मवर्चसम्, आयुः, श्रियं यशः, यज्ञं, वीर्यम् = शरीरबलमिन्द्रयाणां, धातूनाञ्च बलम्, पशुमेवमन्नस्यैश्वर्यप्राप्तेः सामर्थ्यं प्रादुर्भवति, तथा चैतेषां सङ्ग्रहणस्य विवेक उत्पद्यते।

ब्राह्मणोक्तेनानेन रूपकेण विज्ञायते यत्तेजसः, ब्रह्मवर्चसादेश्च सम्प्राप्तेः उपायाः गायत्र्यादिच्छन्दोमयेषु मन्त्रेषु विद्यन्ते। छन्दोविज्ञानेनैव एतत्तेजसादेः ऐश्वर्यमुपात्तुं शक्यते।

ऐतरेयाण्यकेऽपि एतादृशं छन्दसां सामर्थ्यविषयकमेकमुपाख्यानं प्रोच्यते -

**गायत्रं प्रउगं कुर्यादित्याहुस्तेजो वै ब्रह्मवर्चसम्**
**गायत्री तेजस्वी ब्रह्मवर्चसी भवतीति**
**औष्णिहं प्रउगं कुर्यादित्याहुः**
**आयुर्वा उष्णिगायुष्मान् भवतीति**
**आनुष्टुभं प्रउगं कुर्यादित्याहुः क्षत्रं वा**
**अनुष्टुप्क्षत्रस्याऽऽस्या इति**
**बार्हतं प्रउगं कुर्यादित्याहुः श्रीर्वै**
**बृहती श्रीमान् भवतीति**

**पाङ्क्तं प्रउगं कुर्यादित्याहुरन्नं वै**
**पङ्क्तिरन्नवान् भवतीति**
**त्रैष्टुभं प्रउगं कुर्यादित्याहुर्वीर्यं वै**
**त्रिष्टुब्वीर्यवान् भवतीति**
**जागतं प्रउगं कुर्यादित्याहुः**
**जागता वै पशवः पशुमान्भवतीति ॥** (ऐ. आ. १/१/३)

अर्थात् गवामयनयज्ञस्य महाव्रते कर्मणि गायत्रस्य प्रउगशस्त्रस्य पाठं कुर्यादित्युक्तम्, गायत्रं प्रउगशस्त्रं तेजःस्वरूपं, ब्रह्मवर्चसस्वरूपञ्च भवति। गायत्रीच्छन्दसा तेजः ब्रह्मवर्चसश्च प्राप्येते। उष्णिक् प्रउगशस्त्रं पठेदित्युक्तम्, उष्णिक्छन्द आयुस्स्वरूपः। उष्णिक् छन्दसा आयुः युक्तो भवति। अनुष्टुप्प्रउगशस्त्रं कुर्वीतेत्युक्तम्, अनुष्टुप्छन्दो बलस्वरूपः। अनुष्टुप्छन्दसा बलं प्राप्यते। बृहतीप्रउगशस्त्रं कुर्यादित्युक्तम्, बृहतीच्छन्दः श्रीस्वरूपः। बृहत्या छन्दसा श्रियः प्राप्तिर्भवति। पङ्क्तिच्छन्दवान् प्रउगशस्त्रं पठेदित्युक्तम्, पङ्क्तिच्छन्दोऽन्नस्वरूपः। पङ्क्त्या छन्दसान्नं लभते। त्रिष्टुप्प्रउगशस्त्रं कुर्वीतेत्युक्तम्, त्रिष्टुब्वीर्यस्वरूपः छन्दः। त्रैष्टुभेन छन्दसा वीर्यस्य प्राप्तिः सञ्जायते। जगतीमन्तं प्रउगशस्त्रं पठेदित्युक्तम्, जगतीच्छन्दः पशुस्वरूपः। जगतीच्छन्दसा पशवः प्राप्यन्ते।

ऐतरेयब्राह्मणस्य, ऐतरेयारण्यकस्य चाभ्यां प्रसङ्गाभ्यां सुस्पष्टं यच्छन्दांसि वेदानां ज्ञानविज्ञानानामर्थभूतमैश्वर्यं सङ्गोप्य विराजन्ते। मन्त्रेभ्यः छन्दांसि परिहृतेषु मन्त्राणामेतदर्थगौरवम-विदितमेवाभविष्यत्। छन्दसामेतस्याः गोपनीयतायाः कारणेन महर्षियास्केन छन्दश्शब्दस्य परिभाषां कुर्वन्नुक्तम्-

**छन्दांसि छादनात्।** (निरु. ७/३/१२)

अर्थात् आच्छादनस्य कारणेन छन्दांसि छन्दःपदेन कथ्यन्ते।

गायत्र्युष्णिगादीनि छन्दांसि वेदस्यानेकानेकान् विशिष्टानर्थान् समाहितवन्तो वर्तन्ते। मन्त्रगतान् तान् विशिष्टार्थान् देवा ऋषयश्च जनाः सम्प्राप्य समस्तान्नैश्वर्यान्नुपलभन्ते। देवानां विषये छन्दोविषयकमुपनिषद्येकं कथानकं समाख्यातम्। यथा -

**देवा वै मृत्योर्बिभ्यतस्त्रयीं विद्यां प्राविशँ स्ते**
**छन्दोभिरच्छादयन्। यदेभिरच्छादयँ, स्तच्छन्दसां छन्दस्त्वम्॥**[13] (छान्दो. १/४/२)

अर्थात् मृत्युना भयं कुर्वन्तो देवाः त्रयीम् - ऋग्यजुः सामरूपात्मिकायां विद्यायां प्रवेशमकुर्वन्। तैः देवैः छन्दोमयैः मन्त्रैरात्मानमाच्छादितम्। देवाः यदेभिः छन्दोभिरात्मन आवरणमकुर्वन् तदेव छन्दसां छन्दस्त्वं वर्तते।

[13] यस्माच्छादिता देवाश्छन्दोभिर्मृत्युभीरवः। छन्दसां तेन छन्दस्त्वं ख्यायते वेदवादिभिः॥ (गार्ग्य. उपनि. सू. ८/२)

उपनिषदो वचनस्य तात्पर्यं यद्देवैः विद्वद्भिः स्वीयं रक्षणं छन्दोभिः = छन्दात्मकैः मन्त्रैः कृतम्। तेन रक्षणेन देवाः मन्त्रेषु निहितार्थान् विज्ञाय स्वात्मानं कल्मषादिभ्यो रक्षितवन्तः, ये मृत्युरादेः निमित्तारासन्।

तात्पर्यमिदं छन्दोमयाः मन्त्रा उत्तमेभ्यो विचारेभ्यस्सर्वान्नाच्छादयन्ति। एतेनैव कारणेन मन्त्रनिष्ठानि छन्दांसि छन्दो नाम्ना उच्यन्ते।

**मन्त्रा अपि छन्दांसि**

उष्णिगादीनि छन्दांसि तु कथ्यन्ते एव छन्दांसि। अमीषां छन्दोवतां मन्त्रा अपि छन्दांस्येव कथ्यन्ते। छन्दोवन्तो मन्त्रास्सर्वान्नाच्छादयन्त्ययो मन्त्राः छन्दांसि कथ्यन्ते। मन्त्राणाममुं छन्दस्त्वं हर्षटमहाभागेन स्पष्टं कुर्वतोल्लिखितम्-

**चन्दति ह्लादं करोति दीप्यते वा श्रव्यतया इति छन्दः।**

(जयदे. कृ. छन्दःसू. विवृ. हर्षट २/१, पृ. ४)

अर्थाद्यः आनन्दयति श्रवणयोग्यत्वाद्दीप्यते प्रकाशितो वा भवति, तं छन्द इति भाषन्ते।

महर्षिदयानन्देनापि मन्त्राणामिदं छन्दस्त्वं स्पष्टतयेत्थं लिखितम् -

अविद्यादिदुःखानां निवारणात्सुखैराच्छादनाच्छन्दो वेदः। तथा **'चन्देरादेश्च छः'** इत्यौणादिकं सूत्रं ४/२१९ **'चदि आह्लादने दीप्तौ च'** इत्यस्माद्धातोरसुन् प्रत्यये परे चकारस्य छकारादेशे च कृते 'छन्दस्' इति शब्दो भवति। वेदाध्ययनेन सर्वविद्याप्राप्तेर्मनुष्य आह्लादी भवति, सर्वार्थज्ञाता चातश्छन्दो वेदः।

(ऋ.भा.भू. वेदविषय. पृ. ८३)

अर्थाद् अविद्यादिदुःखानां निवारणकरणेन सुखादिभिराच्छादनकरणेन वेदस्य नाम छन्दो वर्तते। तथा **'चदि आह्लादने दीप्तौ च'** धातोः **'चन्देरादेश्च छः'** ४/२१९, अनेनौणादिकसूत्रेण असुन् प्रत्यये कृते चकारस्य छकारादेशे 'छन्दस्' शब्दो निष्पद्यते। छन्दोरूपेण वेदाध्ययनेन सर्वाः विद्याः सम्प्राप्य मनुष्य आह्लादते, प्रसीदति, सर्वांश्चार्थान्नधिगच्छति। अस्माद्धेतोः वेदश्छन्दःशब्देन प्रोच्यते।

निष्कर्षोऽयं वेदमन्त्राः ये गायत्र्यादिभिः छन्दोभिः युक्ताः वर्तन्ते, ते मनुष्यान् सुखेभ्यो वृण्वन्ति, दुःखेभ्यश्च निवारयन्ति।

**वेदाच्छादनानि**

सुखेभ्यो योक्त्रीण्युदाहरणभूतानि वेदाच्छादनानि सन्त्येतानि-

**ग्रामणीरसि ग्रामणीरुत्थायाभिषिक्तोभि मा सिञ्च वर्चसा।**
**तेजोसि तेजो मयि धारय॥** (अथर्व. १९/३१/१२)

अर्थात् ग्रामणीः = ग्रामस्य नेता, प्रमुखः, शासकश्च भवति, सो वर्चश्शक्त्या सिञ्चेत्, सः तेजस्वी वर्तते, तेन नागरान् मनुष्यान् तेजस्वीः कुर्यात्।

**व्रजं न पशुवर्धनाय मन्म॥** (ऋ. ९/९४/१)

अर्थात् शैत्योष्णतावर्षाभ्यो रक्षणाय पशुभ्यो व्रजम् = गोष्ठं यथा क्रियते, तथा मन्म ज्ञानं भवेत्।

**क्रत्वे दक्षाय जीवसे॥** (ऋ. १०/५७/४)

अर्थात् उत्तमैः कर्मभिः जीवनं यापनयोग्यम्।

**जिह्वामूले मधूलकम्।** (अथर्व. १/३४/२)

अर्थात् जिह्वायाः मूलभागस्याग्रे पृष्ठे च माधुर्यं स्यात्, कटुवचांसि न स्युः।

**ईशा वास्यमिदं सर्वम्।** (यजु. ४०/१)

अर्थात् सम्पूर्णे जगतीश्वरो व्यापकः, सम्पूर्णं जगदीश्वरस्यैव वर्तते। सर्वं तस्यैव, लोभो न कार्यः।

**कुर्वन्नेवेह कर्माणि जिजीविषेत्।** (यजु. ४०/२)

अर्थात् कर्माणि सम्पादयन्नेव शतवर्षीयं जीवनमिच्छेत्।

दुःखेभ्यो रक्षणायैतानि वेदाच्छादनानि उदाहरणरूपेण भवन्ति -

**अक्षैर्मा दीव्यः कृषिमित्कृषस्व।** (ऋ. १०/३४/१३)

अर्थात् द्यूतं मा क्रीड, कृषेः कर्म कार्यम्, गृहस्थधर्मः पालनीयश्च।

**केवलाघो भवति केवलादी।** (ऋ. १०/११७/६)

अर्थात् एकाकिनो भुक्तवन्तः केवलं पापकृतो भवन्ति, विभज्य भोक्तव्यम्।

**शतहस्त समाहर सहस्रहस्त सं किर।** (अथर्व. ३/२४/५)

अर्थात् शतेन हस्तैः अर्ज्यम्, सहस्रेण हस्तैः विभाज्यम्। मुक्तहस्तेन देयं, परिश्रमेण सञ्च्यम्।

**सप्त मर्यादाः कवयस्ततक्षुस्तासामिदेकामभ्यंहुरो गात्।** (अथर्व. ५/१/६)

अर्थात् क्रान्तद्रष्टा परमात्मना चौर्यं न कार्यं, व्यभिचारः त्याज्यः, ब्रह्महत्या न विधेया, सुरापानं नैवोचितं, भ्रूणहत्या अकार्या, दुराचारोऽपुनर्विधेयः, पापं न गोप्यमेताः सप्त मर्यादाः निर्दिष्टाः। ताभ्य एकस्यापि वृत्तिर्जीवनेऽयुनक् चेदाजीवनं दुःखमुह्यते।

**मा प्र गाम पथो वयम्।** (ऋ. १०/५७/१)

अर्थात् केऽपि प्राचीनां जीवनशैलीं न परित्यजेयुः, सरलं जीवनमुच्चविचारांश्च धारयेयुः।

**मा नो गामश्वं पुरुषं वधीः।** (अथर्व. १०/१/२९)

अर्थात् मनुष्यान् गाः, अश्वादीन् च न हिंस्युः।

इत्थं वेदेषु समेषां रक्षणाय बहून्याच्छादनानि वर्तन्ते। तेषामाच्छादनानां सम्यग् ज्ञानं छन्दश्शास्त्रस्य ज्ञानेनैव प्रज्ञायते। छन्दसां वेदार्थे महत्युपयोगिता वर्तते। वेदार्थोपलब्धये छन्दसामध्ययनं परमावश्यकमिति निश्चप्रचम्।

**आचार्य सूर्यादेवी चतुर्वेदा**

प्राचार्या

पाणिनि कन्या महाविद्यालय, वाराणसी - १०